# ॥ श्रीरुद्रत्रिशति ॥

ॐ श्री गुरुभ्यो नमः । हरिः ॐ ।

॥ श्रिरुद्रनाम त्रिशति ॥

नमो हिरण्यबाहवे नमः । सेनान्ये नमः ।
दिशां च पतये नमः । नमो वृक्षेभ्यो नमः ।
हरिकेशेभ्यो नमः । पशूनां पतये नमः ।
नमः सस्पिञ्जराय नमः । त्विषीमते नमः ।
पथीनां पतये नमः । नमो बभ्लुशाय नमः ।
विव्याधिने नमः । अन्नानां पतये नमः ।
नमो हरिकेशाय नमः । उपवीतिने नमः ।
पुष्टाणं पतये नमः । नमो भवस्य हेत्यै नमः ।
जगतां पतये नमः । नमो रुद्राया नमः ।
आततायिने नमः । क्षेत्राणां पतये नमः ।
नमः सूताय नमः । अहन्त्याय नमः ।
वनानां पतये नमः । नमो रोहिताय नमः ।
स्थपतये नमः । वृक्षाणं पतये नमः ।
नमो मन्त्रिणे नमः । वाणिजाय नमः ।
कक्ष्हाणं पतये नमः । नमो भुवंतये नमः ।
वारिवस्कृताय नमः । ओषधीनां पतये नमः ।
नम उच्चैर्घोषाय नमः । आक्रन्दयते नमः ।
पत्तीनाम् पतये नमः । नमः कृत्स्नवीताय नमः ।
धावते नमः । सत्वनां पतये नमः ॥

नमः सहमानाय नमः । निव्यादिने नमः ।
आव्याधिनीनां पतये नमः । नमः ककुभाय नमः ।
निषङ्गिणे नमः । स्तेनानां पतये नमः ।
नमो निषङ्गिणे नमः । इषुधिमते नमः ।
तस्कराणां पतये नमः । नमो वञ्चते नमः ।
परिवञ्चते नमः । स्तायूनां पतये नमः ।
नमो निचेरवे नमः । परिचराय नमः ।
अरण्यानां पतये नमः । नमः सृकाविभ्यो नमः ।
जिघांसद्भ्यो नमः । मुष्णतां पतये नमः ।
नमोऽसिमद्भ्यो नमः । नक्तंचरद्भ्यो नमः ।

प्र॒कृ॒न्ताना॒ं पत॑ये॒ नम॑ः । नम॑ उष्णी॒षिणे॑ नम॑ः ।
गि॒रि॒च॒राय॑ नम॑ः । कु॒लु॒ञ्चाना॒ं पत॑ये॒ नम॑ः ।

नम॒ इषु॑मद्भ्यो नम॑ः । ध॒न्वा॒विभ्य॑श्च नम॑ः । वो॒ नम॑ः ।
नम॑ आतन्वा॒नेभ्यो॑ । प्र॒ति॒दधा॑नेभ्यश्च नम॑ः । वो॒ नम॑ः ।
नम॑ आ॒यच्छ॑द्भ्यो॒ नम॑ः । वि॒सृ॒जद्भ्य॑श्च॒ नम॑ः । वो॒ नम॑ः ।
नमोऽस्य॑द्भ्यो॒ नम॑ः । विध्य॑द्भ्यश्च॒ नम॑ः । वो॒ नम॑ः ।
नम॒ आसी॑नेभ्यो॒ नम॑ः । शया॑नेभ्यश्च॒ नम॑ः । वो॒ नम॑ः ।
नम॑ः स्व॒पद्भ्यो॒ नम॑ः । जाग्र॑द्भ्यश्च॒ नम॑ः । वो॒ नम॑ः ।
नम॒स्तिष्ठ॑द्भ्यो॒ नम॑ः । धाव॑द्भ्यश्च॒ नम॑ः । वो॒ नम॑ः ।
नम॑स्स॒भाभ्यो॒ नम॑ः । स॒भाप॑तिभ्यश्च नम॑ः । वो॒ नम॑ः ।
नमो॒ अश्वे॒᳚भ्यो॒ नम॑ः । अश्व॑पतिभ्यश्च॒ नम॑ः । वो॒ नम॑ः ।

नम॑ आव्य॒धिनी॑भ्यो॒ नम॑ः । वि॒विध्य॑न्तीभ्यश्च॒ नम॑ः ।
वो॒ नम॑ः । नम॒ उग॑णाभ्यो॑ नम॑ः । तृ॒ꣳह॒तीभ्य॑श्च॒ नम॑ः ।
वो॒ नम॑ः । नमो॑ गृ॒त्सेभ्यो॑ नम॑ः । गृ॒त्सप॑तिभ्यश्च॒ नम॑ः ।
वो॒ नम॑ः । नमो॒ व्राते॒᳚भ्यो नम॑ः । व्रात॑पतिभ्यश्च॒ नम॑ः ।
वो॒ नम॑ः । नमो॑ ग॒णेभ्यो॑ नम॑ः । ग॒णप॑तिभ्यश्च॒ नम॑ः । वो॒ नम॑ः ।

नमो॒ विरू॑पेभ्यो नम॑ः । वि॒श्वरू॑पेभ्यश्च नम॑ः । वो॒ नम॑ः ।
नमो॑ म॒हद्भ्यो नम॑ः । क्षु॒ल्ल॒केभ्य॑श्च नम॑ः । वो॒ नम॑ः ।
नमो॑ र॒थिभ्यो॑ नम॑ः । अ॒र॒थेभ्य॑श्च नम॑ः । वो॒ नम॑ः ।
नमो॒ रथे॒᳚भ्यो॒ नम॑ः । रथ॑पतिभ्यश्च॒ नम॑ः । वो॒ नम॑ः ।
नम॒स्सेना॒᳚भ्यो नम॑ः । से॒न॒निभ्य॑श्च॒ नम॑ः । वो॒ नम॑ः ।
नम॑ः क्ष॒त्तृभ्यो॒ नम॑ः । स॒ङ्ग्र॒ही॒तृभ्य॑श्च॒ नम॑ः । वो॒ नम॑ः ।
नम॒स्तक्ष॑भ्यो॒ नम॑ः । र॒थ॒का॒रेभ्य॑श्च॒ नम॑ः । वो॒ नम॑ः ।
नम॒ः कुला॑लेभ्यो॒ नम॑ः । क॒र्मारे॒᳚भ्यश्च॒ नम॑ः । वो॒ नम॑ः ।
नम॑ः पु॒ञ्जिष्टे॒᳚भ्यो॒ नम॑ः । नि॒षा॒देभ्य॑श्च॒ नम॑ः । वो॒ नम॑ः ।
नम॑ इषु॒कृद्भ्यो॒ नम॑ः । ध॒न्व॒कृद्भ्य॑श्च॒ नम॑ः । वो॒ नम॑ः ।
नमो॑ मृग॒युभ्यो॒ नम॑ः । श्व॒निभ्य॑श्च॒ नम॑ः । वो॒ नम॑ः ।
नम॒ः श्वभ्यो॒ नम॑ः । श्वप॑तिभ्यश्च॒ नम॑ः । वो॒ नम॑ः

नमो॑ भ॒वाय॑ च॒ नम॑ः । रु॒द्राय॑ च॒ नम॑ः ।
नम॑श्श॒र्वाय॑ च॒ नम॑ः । प॒शु॒पत॑ये च॒ नम॑ः ।
नमो॒ नील॑ग्रीवाय च॒ नम॑ः । शि॒ति॒कण्ठा॑य च॒ नम॑ः ।
नम॑ः क॒प॒र्दिने॑ च॒ नम॑ः । व्यु॑प्तकेशाय च॒ नम॑ः ।

नम॑स्सहस्रा॒क्षाय॑ च॒ नम॑ः । श॒तध॑न्वने च॒ नम॑ः ।
नमो॑ गिरि॒शाय॑ च॒ नम॑ः । शि॒पि॒वि॒ष्टाय॑ च॒ नम॑ः ।
नमो॑ मी॒ढुष्ट॑माय च॒ नम॑ः । इ॒षु॑मते च॒ नम॑ः ।
नमो᳚ ह्र॒स्वाय॑ च॒ नम॑ः । वा॒म॒नाय॑ च॒ नम॑ः ।
नमो॑ बृह॒ते च॒ नम॑ः । वर्षी॑यसे च॒ नम॑ः ।
नमो॑ वृ॒द्धाय॑ च॒ नम॑ः । सं॒वृध्व॑ने च॒ नम॑ः ।
नमो॒ अग्रि॑याय च॒ नम॑ः । प्र॒थ॒माय॑ च॒ नम॑ः ।
नम॑ आ॒शवे॑ च॒ नम॑ः । अ॒जि॒राय॑ च॒ नम॑ः ।
नम॒ः शीघ्रि॑याय च॒ नम॑ः । शीभ्या॑य च॒ नम॑ः ।
नम॑ ऊ॒र्म्या॑य च॒ नम॑ः । अ॒व॒स्व॒न्या॑य च॒ नम॑ः ।
नम॑ः स्त्रोत॒स्या॑य च॒ नम॑ः । द्वीप्या॑य च॒ नम॑ः ।

नमो᳚ ज्ये॒ष्ठाय॑ च॒ नम॑ः । क॒नि॒ष्ठाय॑ च॒ नम॑ः ।
नम॑ः पूर्व॒जाय॑ च॒ नम॑ः । अ॒प॒र॒जाय॑ च॒ नम॑ः ।
नमो॑ मध्य॒माय॑ च॒ नम॑ः । अ॒प॒ग॒ल्भाय॑ च॒ नम॑ः ।
नमो॑ जघ॒न्या॑य च॒ नम॑ः । बुध्नि॑याय च॒ नम॑ः ।
नम॑ः सो॒भ्या॑य च॒ नम॑ः । प्र॒ति॒स॒र्या॑य च॒ नम॑ः ।
नमो॒ याम्या॑य च॒ नम॑ः । क्षेम्या॑य च॒ नम॑ः ।
नम॑ उर्व॒र्या॑य च॒ नम॑ः । खल्या॑य च॒ नम॑ः ।
नम॒ः श्लोक्या॑य च॒ नम॑ः । अ॒व॒सा॒न्या॑य च॒ नम॑ः ।
नमो॒ वन्या॑य च॒ नम॑ः । कक्ष्या॑य च॒ नम॑ः ।
नम॑ः श्र॒वाय॑ च॒ नम॑ः । प्र॒ति॒श्र॒वाय॑ च॒ नम॑ः ।
नम॑ आ॒शुषे॑णाय च॒ नम॑ः । आ॒शुर॑थाय च॒ नम॑ः ।
नम॒ः शूरा॑य च॒ नम॑ः । अ॒व॒भि॒न्द॒ते च॒ नम॑ः ।
नमो॑ व॒र्मिणे॑ च॒ नम॑ः । व॒रू॒थिने॑ च॒ नम॑ः ।
नमो॑ बि॒ल्मिने॑ च॒ नम॑ः । क॒व॒चिने॑ च॒ नम॑ः ।
नम॑श्श्रु॒ताय॑ च॒ नम॑ः । श्रु॒त॒से॒नाय॑ च॒ नम॑ः ।

नमो॑ दुन्दु॒भ्या॑य च॒ नम॑ः । आ॒ह॒न॒न्या॑य च॒ नम॑ः ।
नमो॑ धृ॒ष्णवे॑ च॒ नम॑ः । प्र॒मृ॒शाय॑ च॒ नम॑ः ।
नमो॑ दू॒ताय॑ च॒ नम॑ः । प्रहि॑ताय च॒ नम॑ः ।
नमो॑ निष॒ङ्गिणे॑ च॒ नम॑ः । इ॒षु॒धि॒मते॑ च॒ नम॑ः ।
नम॑स्ती॒क्ष्णेष॑वे च॒ नम॑ः । आ॒यु॒धिने॑ च॒ नम॑ः ।
नम॑ः स्वायु॒धाय॑ च॒ नम॑ः । सु॒धन्व॑ने च॒ नम॑ः ।
नम॒ः स्रुत्या॑य च॒ नम॑ः । पथ्या॑य च॒ नम॑ः ।
नम॑ः का॒ट्या॑य च॒ नम॑ः । नीप्या॑य च॒ नम॑ः ।

नमस्सूद्याय च नमः । सरस्याय च नमः ।
नमो नाद्याय च नमः । वैशन्ताय च नमः ।
नमः कूप्याय च नमः । अवट्याय च नमः ।
नमो वर्ष्याय च नमः । अवर्ष्याय च नमः ।
नमो मेघ्याय च नमः । विद्युत्याय च नमः ।
नम ईध्रियाय च नमः । आतप्याय च नमः ।
नमो वात्याय च नमः । रेष्मियाय च नमः ।
नमो वास्तव्याय च नमः । वास्तुपाय च नमः ।

नमस्सोमाय च नमः । रुद्राय च नमः ।
नमस्ताम्राय च नमः । अरुणाय च नमः ।
नमः शङ्गाय च नमः । पशुपतये च नमः ।
नम उग्राय च नमः । भीमाय च नमः ।
नमो अग्रेवधाय च नमः । दूरेवधाय च नमः ।
नमो हन्त्रे च नमः । हनीयसे च नमः ।
नमो वृक्षेभ्यो नमः अरिकेशेभ्यो नमः ।
नमस्ताराय नमः । नमश्शंभवे च नमः ।
मयोभवे च नमः । नमश्शंकराय च नमः ।
मयस्कराय च नमः । नमः शिवाय च नमः ।
शिवतराय च नमः । नमस्तीर्थ्याय च नमः ।
कूल्याय च नमः । नमः पार्याय च नमः ।
अवार्याय च नमः । नमः प्रतरणाय च नमः ।
उत्तरणाय च नमः । नम आतार्याय च नमः ।
आलाद्याय च नमः । नमः शष्प्याय च नमः ।
फेन्याय च नमः । नमः सिकत्याय च नमः ।
प्रवाह्याय च नमः ।

नम इरिण्याय च नमः । प्रपथ्याय च नमः ।
नमः किंशिलाय च नमः । क्षयणाय च नमः ।
नमः कपर्दिने च नमः । पुलस्तये च नमः ।
नमो गोष्ठ्याय च नमः । गृह्याय च नमः ।
नमस्तल्प्याय च नमः । गेह्याय च नमः ।
नमः काट्याय च नमः । गह्वरेष्ठाय च नमः ।
नमो ह्रदय्याय च नमः । निवेष्प्याय च नमः ।
नमः पांसव्याय च नमः । रजस्याय च नमः ।
नमः शुष्क्याय च नमः । हरित्याय च नमः ।

नमो लोप्याय च नमः । उलप्याय च नमः ।
नम ऊर्व्याय च नमः । सूर्म्याय च नमः ।
नमः पर्ण्याय च नमः । पर्णशद्याय च नमः ।
नमोऽपगुरमाणाय च नमः । अभिघ्नते च नमः ।
नम आक्खिदते च नमः । प्रक्खिदते च नमः ।
नमो वो नमः । किरिकेभ्यो नमः देवानाꣳ हृदयेभ्यो नमः ।
नमो विक्षीणकेभ्यो नमः । नमो विचिन्वत्केभ्यो नमः ।
नम आनिर्हतेभ्यो नमः । नम आमीवत्केभ्यो नमः ।

The Sri Rudra trishati is used to perform archana of Sri Rudra (or Shiva). It is said that this is the
only namavaLi form of addressing the Lord in all of the Vedas. The Sri Rudra Trishati uses the verses of the Sri Rudram in a different form. It is a part of the mahanyaasam as well. Students of Sri Rudram practice the trishati after mastering the Sri Rudram. The Trishati archana is also done during pradosha worship of Sri Shiva.

---

Encoded with accent and proofread by Vaidya Sundaram vaidya_narayanan@yahoo.com

---

Please send corrections to sanskrit@cheerful.com
Last updated February 1, 2003